दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ शरद्-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदशुक्लपूर्णिमा
आश्विन् 10 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-08 ■ वर्ष-5 ■ अङ्क-337 | 1 | सितम्बर 26, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 विकसित-भारतस्य संकल्पाय सर्व-जन-सहभागिता अनतिक्रमणीया - प्रधानमन्त्री

4 देशे मतचौर्यस्य उद्घाटनम्; उपमुख्यमन्त्री मुकेश अग्निहोत्री अवदत्- 'पदात् निष्कास्यताम् ज्ञानेशकुमारः'

8 श्री-निगमान्त- महादेशिकाचार्यः भारतीय- ज्ञान- परम्परायाः समृद्धशिखरपुरुषः- प्रो. मुरलीमनोहरपाठकः

## मुख्यनिर्वाचनायुक्तस्य ज्ञानेशकुमारस्य विरुद्धं तीव्रः रोषः, काङ्ग्रेसदलेन मार्गवरोधः कृतः




**हिमसंस्कृतवार्ता।** काङ्ग्रेसदलेन मुख्यनिर्वाचनायुक्तस्य ज्ञानेशकुमारस्योपरि मतदातृसूच्याः विशेषगहनपुनरीक्षणस्य (एसआईआर) साहाय्येन मतदातृसूच्याः त्रयोदशकोटिभ्यः (१३ कोटिभ्यः) अधिकमतदातॄणां नामानि निष्कास्य 'मतचौर्यं' (वोट चोरी) कृतवान् इति आरोपं प्रस्तुत्य, तस्य त्यागपत्रस्य तथा बन्धनस्य याचनां कृत्वा शुक्रवासरे देशव्यापिरूपेण प्रदर्शनं कृतम्। राष्ट्रियराजधान्यां देहल्यां युवककाङ्ग्रेसदलेन मुख्यनिर्वाचनायुक्तस्य ज्ञानेशकुमारस्य त्यागपत्रस्य तथा निर्वाचनसमीतेः (आयोगस्य) कार्यपद्धतेः निर्णयप्रक्रियायाश्च सम्बन्धितानाम् आरोपाणां निष्पक्षस्वतन्त्रान्वेषणस्य याचनां कृत्वा निर्वाचनायोगकार्यालयस्य बहिः प्रदर्शनं कृतम्। युवककाङ्ग्रेसस्य राष्ट्रीयाध्यक्षस्य उदयभानुचिबस्य नेतृत्वे कार्यकर्तृभिः घोषवाक्यैः सह पारदर्शितायाः उत्तरदायित्वस्य च याचना कृता। असमस्य गुवाहाटीनगरे काङ्ग्रेसकार्यकर्तृभिः मुख्यनिर्वाचनायुक्तस्य ज्ञानेशकुमारस्य त्यागपत्रस्य तथा बन्धनस्य याचनां कृत्वा प्रदर्शनं कृतम्। अत्र आरक्षिभिः (पुलिस) प्रदेशाध्यक्षः गौरवगोगोई आरक्षकनिग्रहे (कस्टडी) गृहीतः। बिहारस्य राजधान्यां पाटलपुत्रे (पटनायां) काङ्ग्रेसकार्यकर्तृभिः प्रदेशाध्यक्षस्य राजेशकुमारस्य नेतृत्वे विरोधप्रदर्शनं कृतम्। दलेन कथितं यत् मुख्यनिर्वाचनायुक्तेन ज्ञानेशकुमारेण 'मतचौर्यं' कृत्वा जनादेशस्य लुण्ठनं कृतम्, एतत् च देशेन सह विश्वासघातः अस्ति। पञ्जाबस्य राजधान्यां चण्डीगढे प्रदेशाध्यक्षस्य राजा-वडिङ्गस्य नेतृत्वे पञ्जाबकाङ्ग्रेसकार्यकर्तृभिः प्रदर्शनं कृतम्। अत्र आरक्षिभिः प्रदर्शनकारिणांोपरि जलतोपस्य (वाटर कैनन) प्रयोगः कृतः। एतदतिरिच्य त्रिपुरायां, मणिपूरे, ओडिशायां, गोवायाम् तथा तमिलनाडुराज्ये अपि प्रदर्शनानि कृतानि।

### ज्ञानेशकुमारस्य विरुद्धं सर्वोच्चन्यायालये याचिका

नवदेहली। मुख्यनिर्वाचनायुक्तस्य ज्ञानेशकुमारस्य विरुद्धं विशेषगहनपुनरीक्षणस्य समये कथितरूपेण वैधानिककर्तव्यानाम् उल्लङ्घनं स्वीकृत्य आपराधिक-अभियोगं चालयितुं सर्वोच्चन्यायालये याचिका प्रविष्टा। याचिकायां एसआईआर-प्रक्रियया सम्बन्धितानां तस्य पक्षतः कथितरूपेण द्वाभ्याम् अन्यनिर्वाचनायुक्ताभ्याम् विना सम्मत्या कृतानां निर्णयानाम्, प्रसारितानां मार्गदर्शिकानां तथा तन्त्रांशे (सॉफ्टवेयर) कृतानां परिवर्तनानाम् असंवैधानिकं तथा निरस्तं घोषयितुं प्रार्थना कृता अस्ति।

## भूपेन्द्रयादवः प्रभावि-वन-प्रबन्धनार्थं क्षमता-संवर्धन-परियोजना इत्याख्यायाः कार्यशालायाः विधिवत् शुभारम्भः कृतवान्




केन्द्रीय-पर्यावरण-वन-जलवायु परिवर्तन-मन्त्रिणा भूपेन्द्र यादवेन नवदेहल्यां प्रभावि-वन-प्रबन्धनार्थं क्षमता-संवर्धन-परियोजना इत्याख्यायाः कार्यशालायाः विधिवत् शुभारम्भः कृतः। अत्रावसरे मन्त्री न्यरूपयत् यत् इयं परियोजना वनाग्नि-प्रबन्धने जैव-विविधता संरक्षणे अथ जलवायु-कार्यान्वयने प्राविधिक क्षेत्रीय-दक्षतानां संवर्धनाय महतीं सम्भावनां धारयति।

## अद्यतनीयं सुभाषितम्

**अहोरात्राणि गच्छन्ति सर्वेषां प्राणिनामिह।**
**आयूंषि क्षपयन्त्याशु ग्रीष्मे जलमिवांशवः।।**

भावार्थः- इस संसार में सभी प्राणिमात्र की आयु दिन और रात्रि के समयचक्र से उसी प्रकार क्षीण हो जाती है जैसे ग्रीष्म ऋतु में जल तुरन्त भाप बन कर नष्ट हो जाता है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## सीबीएसई-संस्थायाः नूतनाध्यक्षः नियुक्तः: आईएएस-अधिकारी मनदीप-भण्डारी ग्रहीष्यति दायित्वम्;



केन्द्रसर्वकारेण शुक्रवासरे बृहत् प्रशासकीयपरिवर्तनं कृतम्। अस्यान्तर्गतं वरिष्ठः आईएएस-अधिकारी मनदीप के. भण्डारी केन्द्रीय-माध्यमिक-शिक्षा-मण्डलस्य (सीबीएसई) नूतनाध्यक्षरूपेण नियुक्तः। तस्य नियुक्तिं मन्त्रिमण्डलस्य नियुक्तिसमित्या अनुमोदिता। कार्मिकमन्त्रालयेन अस्मिन् विषये आदेशः प्रसारितः।

### इदानीं कुत्र पदस्थापितः आसीत् मनदीप-भण्डारी?

मनदीप-भण्डारी २००१ तमस्य संवत्सरस्य (बैच) आईएएस-अधिकारी अस्ति। सः अरुणाचलप्रदेश-गोवा-मिजोरम् तथा केन्द्रशासितप्रदेशानां (एगमूट्) संवर्गात् (कैडर) आगच्छति। सीबीएसई-अध्यक्षपदग्रहणात् पूर्वं सः जम्मू-कश्मीरस्य उपराज्यपालस्य प्रधानसचिवरूपेण कार्यं कुर्वन् आसीत्।

# विकसित-भारतस्य संकल्पाय सर्व-जन-सहभागिता अनतिक्रमणीया - प्रधानमन्त्री



'सेवासङ्कल्प-अभियानान्तर्गते' काशीतः वडनगरं यावत् प्रस्थिताभिः सेवायात्रिभिः सह आभासीयसंवादे प्रधानमन्त्री श्रीमोदी उदघोषयत् यत् सर्वेषां सहभागित्वेन योगदानेन चैव 'विकसितं भारतम्' इति सङ्कल्पः सिद्ध्येत्।। वडनगरं मह्यं जीवनस्य आधारभूतान् संस्कारान् अयच्छत्, काशी च तेषु संस्कारेषु सेवानुरागस्य अनन्तान् वर्णान् समवयत् इति श्रीमोदी प्रत्यपादयत्। युवानः अपि अनेकैः सेवावर्णैः एतां यात्रां भूषयन्ति इति सः परं सन्तोषं प्राकटयत् । विगतेषु द्वादशसु वर्षेषु भारते नगर-ग्रामयोः पारम्परिकं वैषम्यं भूयसा ह्रासमगच्छत् इति प्रधानमन्त्रिणा साङ्केतितम्। अद्यत्वे ग्रामेषु आधारभूत-तन्त्राणां महती समृद्धिः अभवत्, राष्ट्रस्य नारीणां स्वावलम्बनम् अपि उत्कर्षं प्राप । संवादावधौ यात्रिणः स्वकीयान् अनुभूति-सञ्चयान् प्रधानमन्त्रिणः पुरतः न्यवेदयन्। प्रधानमन्त्री अपि यात्रिणः दैनन्दिन्याम् स्वकीयान् यात्रा-अनुभवान् समालेखितुम् अभ्यप्रार्थयत्।

## मेक इन् इण्डिया' इत्यस्याः राष्ट्रीय-नीत्या देशे स्वदेशीया उत्पादकता सुदृढा अभवत्, वैदेशिक-निवेशस्य वर्धनं जातम् - प्रधानमन्त्री

मेक इन् इण्डिया' इत्यस्याः राष्ट्रीय-नीतेः द्वादश वर्षपूर्तिम् उपलक्ष्य प्रधानमन्त्री नरेन्द्रमोदी अस्याः ऐतिहासिकं साफल्यं सप्रश्रयं रेखाङ्कितवान्। सामाजिकान्तर्जालीयं सन्देशं ददत् श्रीमोदी अकथयत् यत् "अनया नीत्या देशे स्वदेशीया उत्पादकता सुदृढा अभवत्, वैदेशिक-निवेशस्य वर्धनं जातम्, भारतस्य निर्यातः च नूतनामुन्नतिमस्पृशत्। एषः क्रान्तिकारी परिवर्तन-प्रवाहः सम्प्रति देशस्य सर्वेष्वपि क्षेत्रेषु प्रत्यक्षं दृश्यते। प्रधानमन्त्रिणा प्रोक्तं यत् 'मेक इन् इण्डिया' केवलं निर्माणकार्यं नास्ति, प्रत्युत एतत् तादृशस्य आधारभूत-तन्त्रस्य, उद्यमशीलतायाः, नवोन्मेषस्य च सृजनम् अस्ति, येन भारतवर्षं निरन्तरं समृद्धि-पथि अग्रसरं भवेत्

# दीनदयाल-ग्रामीण-कौशल-योजनया सप्तति-सहस्र-युवकानां प्रशिक्षणाय प्रशासनेन व्यधायि निर्णयः

DDU-GKY
Deen Dayal Upadhyaya Grameen Kaushalya Yojana
Empowering India • Powering the World

दीनदयाल उपाध्याय-ग्रामीण-कौशल्या-योजनायाः प्रत्यग्र-संस्करणे आगामि-मासात् आरभ्य विविध-राज्येषु केन्द्र-शासित प्रदेशेषु च सप्तति-सहस्रं ग्रामीण-युवानः वृत्ति-कौशल-शिक्षणेन अनुग्रहीष्यन्ते। केन्द्र-सर्वकार-पोषित-प्राधान्या एषा योजना निर्धन-ग्रामीण युवकानाम् आजीविका सम्बद्धं कौशल-संवर्धनं विधातुम् सन्नद्धा वर्तते। अस्य प्रशिक्षणस्य समयावधिः त्रिमासात् आरभ्य द्वादश-मासावधिः निर्धारिता अस्ति। ग्रामीण-विकास-मन्त्रालयेन उदीरितं यत् अस्मिन् अभियाने सम्बद्धेभ्यः एकत्रिंशत् राज्येभ्यः केन्द्रशासित-प्रदेशेभ्यः च आगामि-वर्षद्वयस्य चक्राय नव-लक्ष्याधिकेभ्यः युवकेभ्यः प्रशिक्षण संवर्धनस्य बृहत् लक्ष्यं समर्पितम्।

# आईबीएसए-मञ्चे पहलगाम आक्रमणस्य तीव्र-निन्दा, आतङ्कवाद-उन्मूलनाय दृढसङ्कल्पश्च प्रकटितः



संयुक्तराष्ट्र-महासभायाः उपवेशने न्यूयोर्क नगरे (आई.बी.एस.ए) इति मञ्चस्य अन्तर्गतं आयोजितायां मन्त्रिस्तरीय-गोष्ठ्यां भारतस्य विदेश-कार्य-मन्त्री डॉ. एस. जयशङ्करः, दक्षिण अफ्रीकायाः विदेशमन्त्री रोनाल्ड लेमोला, ब्राजील-देशस्य विदेशमन्त्री मौरो विएरा च सम्भूय पहलगाम नगरे सञ्जातस्य आतङ्कवादी-आक्रमणस्य तीव्र भर्त्सनम् अकुर्वन्, आतङ्कवादं प्रति निरपेक्ष-असहनशीलताम् इति स्वकीयं दृढसङ्कल्पम् च पुनरभ्यस्यन् । त्रिभिः अपि मन्त्रिभिः संयुक्तराष्ट्रस्य नियमपत्रस्य अन्ताराष्ट्रिय-विधिसंहितायाः, सुदृढ-बहुपक्षीय-व्यवस्थायाः च प्रति स्वकीया प्रतिबद्धता प्रदर्शिता। एकस्मिन् संयुक्त-विज्ञापने आई.बी.एस.ए-नेतारः संयुक्त-राष्ट्र-सुरक्षा-परिषदः व्यापक परिष्कारस्य आह्वानम् अकुर्वन्, येन एषा संस्था समकालीन-यथार्थतायाः प्रतिनिधित्वं कुर्वाणा अधिका लोकतान्त्रिक-प्रभाविणी च भवेत्। अत्रावधेयं यत् तैः जलवायु परिवर्तनस्य समाह्वानानाम् त्वरित-समाधानाय, नवीकरणीय ऊर्जायाः प्रसाराय, साङ्गणकीय-सम्पर्क-संवर्धनाय अथ आर्थिक समृद्ध्यै कृत्रिम प्रज्ञायाः समुचित-उपयोगाय विशेषं बलं दत्तम्




# एशियाई-क्रीडासु दश मी.एअर-पिस्टल-स्पर्धायां भारतस्य कमलजीत-सुरुचि-युग्मेन स्वर्णपदकं प्राप्नोत्

जापानदेशस्य ऐचीनागोयानगरे एशिया-प्रतिस्पर्धायां महिलानां शाट्पुट्-स्पर्धायां भारतीय-क्रीडिका मन्प्रीत-कौर कांस्यपदकं प्राप्नोत् । एतेन विजयोपलम्भेन सा एशियाक्रीडासु शाट्पुट्-स्पर्धायां पदकं प्राप्तवती तृतीया भारतीय महिला अभवत्। षट्त्रिंशद्वर्षीया सा सप्तदश दशमलव सप्तदश मीटर् इति स्वस्य सर्वोत्तमं प्रक्षेपणं कृत्वा चीनदेशस्य स्वर्णपदकविजेत्री सोङ्ग-जियायुवान् तथा रजतपदकविजेत्री झाङ्ग-लिनरो इत्येतयोः पश्चात् तृतीयस्थानं प्राप्नोत्। मन्प्रीत् सर्वप्रयत्नेन उत्कृष्टं प्रदर्शनं कृत्वा चतुर्थप्रक्षेपणे सप्तदश मीटर्-मानम् अतिक्रम्य कांस्यपदकं प्राप्तवती। भारतस्य कृष्ण-जयशङ्कर-मेनन् षोडश दशमलव सप्त मीटर् इति स्वस्य सर्वोत्तमं प्रक्षेपणं कृत्वा पञ्चमस्थानं प्राप्तवान्। एकपञ्चाशत्यधिक-नवदशशततमे वर्षे बार्बरा-वेब्स्टर तथा त्रयोविंशत्यधिक-द्विसहस्रतमे वर्षे किरण-बलियान इत्येते एव अन्ये भारतीयाः महिलाः अस्यां स्पर्धायां पदकं प्राप्तवत्यः। उभे अपि कांस्यपदकं प्राप्तवत्यौ।




# ग्रेटर-नोएडा-नगरे उत्तरप्रदेश-अन्ताराष्ट्रिय-व्यापार-मेलापकस्य उद्घाटनं कृतवान् गृह-मन्त्री अमितशाहः

वैश्विकानिश्चिततासु सत्यपि भारतेन सप्तदशांश अष्ट प्रतिशतं विकासं सम्प्राप्य तीव्रतम-वर्धमान-अर्थव्यवस्थायाः स्थानं सुरक्षितम्, इति ग्रेटर नोएडा-नगरे उत्तरप्रदेश-अन्ताराष्ट्रिय-व्यापार मेलायाः उद्घाटनकाले गृह-मन्त्री अमितशाहः उदघोषयत्। सः अवदत् यत् 'मूडीज' इति संस्थया भारतस्य विकास-पूर्वानुमानं प्रवर्धितम्, 'जे.सी. आर. संस्थया च देशस्य सार्वभौम-मानङ्कनं समुन्नतम् ।

# 'मम जिह्वायाः प्रमादे सति भाजपादलं हास्यकणिकां करोति'; मुख्यमन्त्री सुक्खूमहोदयः अवदत्- 'हिमाचलस्य स्वर्णयुगस्य शुभारम्भः जातः'



हिमसंस्कृतवार्ताः- सिरमौरम्।

"यदि कस्याञ्चित् जनसभायां मम जिह्वायाः प्रमादः (वाग्-दोषः) सम्भवेत्, तर्हि भाजपादलस्य 'दीपकमल' कार्यालये उपविष्टा चत्वारिंशत्-जनानां (४०) दलं तं हास्यकणिकां विधाय उपहसति; किन्तु प्रदेशस्य प्रबुद्धा जनता यथार्थं सम्यक् विजानाति।" इदम् उद्गारं हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः सिरमौर- मण्डलस्य पच्छाद-उपमण्डलमुख्यालये सराहांक्षेत्रे आयोजिते राज्यस्तरीय-श्रीवामनद्वादशी-मेलायाः समापनसमारोहे जनसभां सम्बोधयन् प्राकटयत्।

मुख्यमन्त्रिणा स्वकीय-द्वाविंशति-निमेषात्मके (२२ निमेषेषु) सम्भाषणे भाजपा-दलस्य उपरि तीक्ष्णं वाक्प्रहारं विहितम्। सः अवदत् यत् पच्छादक्षेत्रस्य विधायिका भाजपा-दलसम्बद्धा अस्ति, भवन्तः तां पृच्छन्तु यत् पूर्वतन- भाजपासर्वकारेण प्रदेशहितानि उपेक्ष्य 'बीबीएन'-क्षेत्रे पञ्चसहस्र-बीघापरिमितं (५,०००) भूमिक्षेत्रं विना पञ्जीकरणम् एव कथम् एक-कोटि-रूप्यकेभ्यः विक्रीतम्।

सुखविन्दरसिंहसुक्खू-महोदयः प्रतिपादितवान् यत् यदा सः मुख्यमन्त्री अभवत्, तदा तेन ज्ञातं यत् पूर्वशासने दशरूप्यकाणां वस्तु शतरूप्यकेषु (१० तः १००) क्रीतं भवति स्म। व्यवस्था-परिवर्तनाय कठोराः निर्णयाः गृह्यन्ते, येषां प्रभावेण २०२७ तमं वर्षं यावत् हिमाचलप्रदेशः आत्मनिर्भरराज्यं भविष्यति, २०३२ तमे वर्षे च देशस्य समृद्धतमं राज्यं भवितुम् अग्रेसरः वर्तिष्यते।

## किशाऊ-जलबन्धात् हिमाचलस्य कृते १२०० तः १५०० कोटि-रूप्यकाणाम् आयः भविष्यति

मुख्यमन्त्रिणा उल्लिखितं यत् सः सामान्य-कुटुम्बात् मुख्यमन्त्रिणः आसन्दं सम्प्राप्तः, विगतवर्षेषु प्रदेशहिताय निरन्तरं सङ्घर्षं कुर्वन्नस्ति। किशाऊ- जलबन्ध- परियोजनायाः विषये भाजपादलेन तादृशः अनुबन्धः कृतः आसीत् येन बन्धनिर्माणस्य भारः प्रदेश-सर्वकारेणापि वहनीयः स्यात्। किन्तु वर्तमानसर्वकारेण दृढसङ्घर्षं विधातुं केन्द्रसर्वकारः अन्य-राज्यानि च सर्वं व्ययं वोढुं स्वीकृतानि। अस्मात् जलबन्धात् आगमिष्यति काले हिमाचलप्रदेशाय द्वादश-शत-तः पञ्चदश-शत-कोटि- रूप्यकाणां (१२००–१५०० कोटि) वार्षिकम् आयं भविष्यति।

सः अवदत् यत् केन्द्र-हरियाणा-सर्वकारौ अस्माकं समक्षं नमितौ, यतो हि आगामिषु वर्षेषु राष्ट्रिय-राजधानीक्षेत्रे देहल्यां च जलस्य महान् सङ्कटः उद्भविष्यति; तत्रत्या पिपासा केवलं हिमाचलस्य जलेन एव शमिष्यति। देशस्य रक्षायै हिमाचली-सैनिकैः सर्वाधिकं बलिदानं दत्तम्; अतः अस्माकं सम्पत्तौ प्रचलन्त्याः महत्याः परियोजनायाः व्ययं वयं किमर्थं वहेम?

## ग्रामीण-जनतायाः हिताय धनराशिः आवश्यकी

केन्द्रीय- गृहमन्त्रिणा सह १६ जून-दिनाङ्के सञ्जाते उपवेशने हिमाचलस्य पक्षः दृढतया उपस्थापितः। मुख्यमन्त्रिणा प्रोक्तं यत् प्रदेशस्य नवति-प्रतिशतं (९०%) जनता ग्रामेषु निवसति। ग्रामेषु उत्तमानां विद्यालयानां, स्वास्थ्य-संस्थानानां, मार्गाणां च विकासाय वित्तस्य आवश्यकता अस्ति। निजी-विद्यालयानां प्रतिरूपेण ग्रामीण-क्षेत्रेषु 'सीबीएसई'- संयुक्ताः विद्यालयाः उद्घाटिताः, सराहां-क्षेत्रेऽपि अयम् आरब्धः।

सर्वकारेण गो-दुग्धस्य न्यूनतम-समर्थन-मूल्यं निर्धारितं, येन कृषकाः प्रतिमासं पञ्चविंशति-तः त्रिंशत्- सहस्ररूप्यकाणि (२५,०००–३०,०००) अर्जयन्ति। आगामिकाले सिरमौरस्य प्रमुख-नकदी- शस्यस्य लशुनस्य, आर्द्रकस्य च समर्थनमूल्यं संवर्ध्य निर्धारयिष्यते।

पूर्व-सर्वकारेण त्यक्तस्य ऋण-भारस्य शोधनाय एव नूतनम् ऋणं स्वीक्रियते। कर्मचारिभ्यः पुरातनवृत्ति- योजना प्रदत्ता, अवशिष्टेभ्यः अपि शीघ्रमेव प्रदास्यते। यदि भाजपादलं सत्ताम् आगमिष्यति, तर्हि ओपीएस-योजना पिहिता भविष्यति। सर्वोच्च-न्यायालये राज्यसर्वकारः प्रदेशहिताय सङ्घर्षं करोति, यतः ५०० कोटि-रूप्यकाणां आश्रयः अपेक्षितः अस्ति।

## सर्वैः आन्तरिक-बाह्य-आह्वानैः सह युध्यते सर्वकारः

हिमाचले एसजेवीएन-संस्थायाः वार्षिक-व्यवसायः ६७,००० कोटिरूप्यकाणां वर्तते, यत्रैव हिमाचलसर्वकारस्य वार्षिक-आयव्ययकः ५४,००० कोटि-रूप्यकाणाम् अस्ति। कर्मचारिभ्यः शीघ्रमेव महार्घता-वृत्तेः अवशिष्टांशं प्रदास्यते। आह्वानानि आभ्यन्तराणि बाह्यानि च सन्ति, किन्तु सर्वकारः सर्वैः सह युध्यते।

१९५५ तः हिमाचलस्य कृते प्राप्यमाणा 'आरडीजी' केन्द्र-सर्वकारेण पिहिता। विपक्षस्य आक्षेपान् प्रत्याख्यान् सः अवदत् यत् कर्मचारिभ्यः निवृत्तेभ्यश्च वेतनं वृत्तिश्च समये एव दीयते। मुख्यमन्त्रिणा इदमपि विज्ञापितं यत् प्रदेशस्य विधवा-भगिनीनां पुत्राणां विद्याभ्यासाय प्रतिमासं १००० रूप्यकाणि, कन्यानां कृते च १५०० रूप्यकाणि प्रदातुं नूतना योजना शीघ्रमेव प्रवर्त्यते।




# अंशविपण्यां पुनरुत्थानम्, प्रमुखसूचकाङ्कौ सुदृढौ

**हिमसंस्कृतवार्ताः- डॉ. विमलेश झा, मुम्बई २५ सितम्बर २०२६**

शुक्रवासरे भारतीय-अंशविपण्यां गतदिवसे दृष्टस्य तीव्रविक्रयप्रभावस्य अनन्तरं पुनः क्रय-उत्साहः दृष्टः। मूल्यवान् अंशानां क्रयेन प्रमुखसूचकाङ्कयोः वृद्धिः अभवत्। निफ्टी-५० सूचकाङ्कः ७७.४० अङ्कैः अर्थात् ०.३४ प्रतिशतं वर्धित्वा २३,१४०.५० अङ्केषु व्यवहारे समापितः। बीएसई- सेन्सेक्स-सूचकाङ्कः ३१५.२० अङ्कैः अर्थात् ०.४३ प्रतिशतं वर्धित्वा ७३,८९५.७४ अङ्केषु स्थितः। विपण्यां सर्वतोमुखः क्रयप्रवाहः दृष्टः। विशेषतः वाहन, उपभोक्तृ- दीर्घकालिकवस्तु, रियल्टी, वित्तीयक्षेत्रेषु अंशेषु क्रयः अभवत्। निफ्टीसूचकाङ्के समाविष्टेषु ५० अंशेषु ३४ अंशानां मूल्यवृद्धिः, १५ अंशानां मूल्यानाम् अवनतिः, एकस्य च अंशस्य मूल्यं स्थिरम् आसीत्। एक्सिसबैंक, महिन्द्रा एण्ड महिन्द्रा, एचडीएफसीबैंक इत्यादयः अंशाः निफ्टीसूचकाङ्कस्य वृद्धौ सहायकाः अभवन्। अपरतः सूचनाप्रौद्योगिकी तथा स्वास्थ्यसम्बद्धेषु अंशेषु प्रभावः दृष्टः। तैलमूल्ये किञ्चित् शैथिल्यं तथा रूप्यकस्य सुदृढता निवेशकानां भावनायां सहायकौ अभवताम्। तथापि उच्चवैश्विक-बन्धक- प्रतिफलाः, विदेशीयसंस्थागतनिवेशकानां विक्रयः विपण्यां चिन्तायाः कारणे स्तः।

सप्ताहस्य दृष्ट्या तु निफ्टी तथा सेन्सेक्स इत्येतयोः क्रमशः सप्तमः साप्ताहिक-अवनतिक्रमः अभवत्। निफ्टीः गतसप्ताहस्य तुलनया ०.८८ प्रतिशतं तथा बीएस ईसेन्सेक्स ०.५३ प्रतिशतं न्यूनः स्तरः प्राप्तवान्। समग्रतया, अद्य भारतीय-अंशविपण्यां गतदिवसस्य तीव्र- अवनतेः अनन्तरं पुनरुत्थानं दृष्टम्, यद्यपि वैश्विक- आर्थिक- परिस्थितयः, अपरिष्कृत- तैलस्य मूल्यं, विदेशीय-निवेशकानां विक्रयः अद्यापि विपण्याः कृते महत्त्वपूर्णाः सन्ति।

# देशे मतचौर्यस्य उद्घाटनम्; उपमुख्यमन्त्री मुकेश अग्निहोत्री अवदत्- 'पदात् निष्कास्यताम् ज्ञानेशकुमारः'



**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेशस्य उपमुख्यमन्त्री मुकेश अग्निहोत्री-महोदयः शुक्रवासरे मुख्य-निर्वाचन-आयुक्तं ज्ञानेशकुमारं विरुद्ध्य आयोजिते विरोध-प्रदर्शने सम्मिलितः अभवत्। अस्मिन् अवसरे प्रदेश-काङ्ग्रेस- प्रभारिणी रजनी-पाटिल-महोदया, दलस्य अन्ये नेतारः, कार्यकर्तारश्च अपि उपस्थिताः आसन्। इदं प्रदर्शनं राज्य-निर्वाचन-आयोगस्य कार्यालयस्य पुरतः सम्पादितम्। प्रदर्शनकाले उपमुख्यमन्त्रिणा मुकेश अग्निहोत्रिणा प्रतिपादितं यत् देशे येन प्रमाणेन सर्वकाराणां तथा च मताधिकाराणां चौर्यस्य आक्षेपाः प्रत्यक्षम् आगताः, तेषां उद्घाटनं जातः अस्ति। सः अवदत् यत् अधुना एतेषु प्रकरणेषु निर्वाचन-आयोगस्य भूमिकायाः उपरि गम्भीराः प्रश्नाः उत्थिताः सन्ति।
सः मुख्य-निर्वाचन-आयुक्तं ज्ञानेशकुमारं लक्ष्यीकृत्य आरोपम् अकरोत् यत् निर्वाचन-आयोगस्य स्तरे बहु-सङ्ख्याकाः मतदातारः स्वकीय-मतदान-अधिकारतः वञ्चिताः कृताः। मुकेश अग्निहोत्रिणा विज्ञापितं यत् 'विशेष- गहन-पुनरीक्षण' काले देशस्य त्रिंशत्सु (३०) राज्येषु केन्द्रशासित- प्रदेशेषु च त्रयोदश-कोटिभ्यः (१३ कोटि) अधिकानां मतदातॄणां नामानि प्रारूप-मतदाता- सूचीभ्यः निष्कासितानि इति वृत्तम् उद्घाटितम् अस्ति। 'इण्डियन् एक्स्प्रेस'-पत्रिकायाः अन्वेषण-प्रतिवेदनानुसारं निर्वाचन-आयुक्तौ सुखबीरसिंह-सन्धू-महोदयः विवेकजोशी-महोदयश्च विगतदशसु मासेषु न्यूनातिन्यूनं चतुर्दशवारं (१४) विविधानां निर्णयानां प्रक्रियाणां च उपरि स्वकीयां विप्रतिपत्तिं (आपत्तिं) पञ्जीकृतवन्तौ। नूतन-मतदातॄणां पञ्जीकरणे सूचीतः च नाम-अपाकरणे अपि संशयाः उत्पन्नाः सन्ति।

## आयोगस्य कार्य-प्रणाल्यां प्रश्न-चिह्नानि- उपमुख्यमन्त्री

उपमुख्यमन्त्रिणा प्रोक्तं यत् द्वयोः निर्वाचन-आयुक्तयोः आपत्तीनां पश्चात् निर्वाचन-आयोगस्य कार्य-पद्धतेः उपरि समग्रे देशे चर्चा संवृत्ता। सः कटाक्षं कुर्वन् अवदत् यत् आक्षेपाः निर्वाचन-आयोगस्य उपरि वर्तन्ते, किन्तु तेषाम् उत्तरं भारतीय-जनता-पक्षस्य नेतारः यच्छन्ति। काङ्ग्रेसनेता राहुल गान्धी सुदीर्घ-कालात् मतदाता- सूचीषु जातानाम् अनियमिततानां मत-चौर्यस्य च विषयम् उत्थापयति, अधुना च प्रकटितेन प्रतिवेदनेन एते प्रश्नाः अधिकाः गम्भीराः सञ्जाताः।
मुकेश-अग्निहोत्रिणा स्पष्टा याचना कृता यत् मुख्य-निर्वाचन-आयुक्तस्य ज्ञानेश-कुमारस्य विरुद्धम् अभियोगः पञ्जीकरणीयः तथा च सः सद्यः स्व-पदात् निष्कासनीयः। येषु राज्येषु निर्वाचनेषु मतदाता-सूचीनां दुर्व्यवस्थायाः आक्षेपाः प्रत्यक्षम् आगताः, तत्र पुनः निर्वाचनानि आयोजनीयानि। सः सचेतयन् अवदत् यत् यदि केन्द्र-सर्वकारेण एतासां याचनानां परिपालने समुचिता कार्यविधिः न क्रियते, तर्हि काङ्ग्रेस-पक्षः इमं विषयम् आदाय राष्ट्रव्यापी-आन्दोलनं करिष्यति। लोकतन्त्रे प्रत्येकस्य पात्र-नागरिकस्य मताधिकारस्य संरक्षणं परमावश्यकम् अस्ति।



# हत्या-प्रकरणे पञ्च अभियुक्ताः गृहीताः, रक्तमिश्रित-मरिच चूर्णेन आक्रमणम्

हिमसंस्कृतवार्ताः- सन्तकबीरनगरम्, उत्तरप्रदेशः
खलीलाबाद- कोतवालिक्षेत्रस्य भकठान-गोसायीपुरे सितम्बरमासस्य २२ दिनाङ्के ब्रह्मनन्द यादवस्य हत्याप्रकरणे पुलिसदलेन पञ्च अभियुक्ताः गृहीताः। पुलिसस्य अनुसारं अभियुक्तैः प्रथमं ब्रह्मनन्दस्य नेत्रयोः रक्तमरिचचूर्णं क्षिप्त्वा ततः लघुदण्डैः, लौह-गैंत्याख्येन उपकरणेन च तस्योपरि प्रहारः कृतः। अभियुक्तानां निर्दे-शानुसारं चत्वारः वंशदण्डाः, एका लौहगैंती तथा घटनायां प्रयुक्तं रक्तमरिचचूर्णं च अभिगृहीतमिति पुलिसेन कथितम्। पुलिसस्य अनुसारं भकठान-गोसायीपुरनिवासी रमाकान्त यादवेन सितम्बरमासस्य २२ दिनाङ्के खलीलाबाद-कोतवाल्यां लिखिता सूचना प्रदत्ता। तस्यां सूचनायां कथितं यत् तस्य भ्राता ब्रह्मनन्द यादवः द्विचक्रिकया गिढ़िनी-बाजारं प्रति गच्छन् आसीत्। राकेश यादवस्य गृहस्य पुरतः प्राप्ते सति अभियुक्तैः तस्य द्विचक्रिका अवरोधिता तथा नेत्रयोः रक्तमरिचचूर्णं क्षिप्तम्। ततः तेन सह मारपीटः कृतः। आहतं ब्रह्मनन्दं जनपद- चिकित्सालयं नीतम्, यत्र चिकित्सकैः तं मृतः घोषितम्।
पुलिसदलेन अभिमन्यु यादवः, अजय यादवः, रामस्वरूप यादवः, संजय यादवः इत्येते चत्वारः अभियुक्ताः सितम्बरमासस्य २३ दिनाङ्कस्य रात्रौ बयारामार्गे मंझरिया-रेलमार्गसङ्गमस्य समीपात् गृहीताः। अपरः अभियुक्तः राकेश यादवः महाराजगञ्ज- जनपदस्य भिठौली थानाक्षेत्रे शिकारपुर- नहर- सेतुसमीपस्थात् त्रिमार्गसङ्गमात् गृहीतः। पुलिसस्य कथनानुसारं विवेचनाक्रमे राकेश यादवस्य नाम प्रकाशमागतं। पृच्छायां तेन पूर्ववैरस्य कारणेन घटना कारिता इति कथितम्। पुलिसस्य दावानुसारम् आगामी ग्रामप्रधान-निर्वाचनं प्रति विद्यमानवैरभावनया अभियुक्तैः ब्रह्मनन्द यादवस्य मार्गात् निष्कासनस्य योजना अपि कृता आसीत्। तथापि पृच्छायां प्राप्तानां आरोपाणां सत्यता विवेचनायां न्यायिकप्रक्रियायां च एव सुनिश्चिताभविष्यति।
बंदीकरणं, वस्तूनां प्राप्तेः आधारेण प्रकरणे भारतीय- न्याय- संहितायाः (बीएनएस) १९१(२), १९१(३), १९०, ६१(२) इत्येताः धाराः अपि संवर्धिताः। पुलिस-अधीक्षकस्य सन्दीपकुमार मीना इत्यस्य निर्देशनानुसारं सम्पन्नेऽस्मिन् कार्ये खलीलाबाद- कोतवाली- पुलिसदलस्य, एसओजी- दलस्य सदस्याः सम्मिलिताः आसन्।

# वित्तीयकाठिन्येन स्थगितः महत्त्वाकांक्षी 'रज्जुमार्ग-प्रकल्पः', राज्यसर्वकारेण निरस्तीकृताः वित्तीयनिविदाः

**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेशस्य राजधान्यां शिमलायां यानावरोधस्य गम्भीर-समस्यायाः निवारणाय सज्जीकृता महत्त्वाकाङ्क्षिणी 'शिमला- रज्जुमार्ग-परियोजना' राज्यस्य सङ्कटापन्नायाः आर्थिकस्थितेः कारणेन अन्तराले (अधरे) लम्बिता जाता। प्रदेश-सर्वकारेण अस्याः परियोजनायाः कार्ये सम्प्रति प्रतिबन्धः आरोपितः, निर्गताः सर्वाः अपि वित्तीयनिविदाः साकल्येन निरस्तीकृताः।
अयम् उद्घाटित-वृत्तान्तः हिमाचलप्रदेश-उच्चन्यायालये प्रचलन्त्याः जनहित-याचिकायाः विचारणाकाले राज्य-₹सर्वकारेण प्रविष्टेन नूतनेन शपथपत्रेण प्रत्यक्षम् आगतः। मुख्य-न्यायाधीशस्य गुरमीतसिंहसन्धावालिया- महोदयस्य, न्यायमूर्ति-बिपिनचन्द्रनेगी- महोदयस्य खण्डपीठस्य समक्षं राज्यसर्वकार-पक्षतः न्यायालयः विज्ञापितः यत् राज्यस्य दुर्बलां वित्तीयस्थितिं विचिन्त्य शिमला-रोपवे-परियोजनायाः प्रस्तावे स्थगनादेशः स्वीकृतः, सर्वकारस्य अधिकृत-आदेशेन अस्य प्रकल्पस्य सर्वाः वित्तीयनिविदाः अपि निरस्तीकृताः।

## परियोजनायाः मूलदैर्घ्यं १३.७९ किलोमीटर- परिमितम् आसीत्

अस्याः रज्जुमार्ग-परियोजनायाः मूल-दैर्घ्यं १३.७९ किलोमीटर-परिमितम् आसीत्। अस्मिन् तिसृषु पृथक्-पङ्क्तिषु आहत्य त्रयोदश (१३) आरोहण-अवरोहण- स्थानकानि, एकं वर्त्तन-स्थानकं निर्मातव्यम् आसीत्। पूर्वं सर्वकारः एतां बाह्य-सहायताप्राप्त- परियोजनारूपेण विकसितुं विचारयति स्म, यदर्थं प्रकरणं परिवहन-विभागस्य उच्चाधिकारिभ्यः सम्प्रेषितम् आसीत्।
यद्यपि सर्वकारेण साक्षात् वित्तीय-साहाय्यात् स्वहस्तः प्रतिसंहृतः, तथापि प्रकल्पः सम्पूर्णतया न पिहितः। **'रज्जुमार्ग-एवं-द्रुत-परिवहन-विकास-निगमः'** अधुना एनां परियोजनां कस्मिंश्चित् व्यवहृत-प्रारूपे सञ्चालयितुं सम्भावनाः अन्वेषयति, येन सर्वकारस्य उपरि आर्थिकभारः न पतेत्।

# डीपीएस-बोकारो-विद्यालयस्य मुख्याध्यापकः गोपालः शिक्षकश्च रोहितः राष्ट्रिय- शिक्षक- पुरस्कारेण सम्मानितौ



- **शिक्षाक्षेत्रे उत्कृष्टयोगदानाय नवाचाराय च राष्ट्रियकीर्तिः- प्राचार्येण डॉ. गंगवारेण शुभकामना प्रदत्ता।**
- **झारखण्डात् केवलं द्वयोः शिक्षकयोः चयनम्।**

हिमसंस्कृतवार्ताः- सौरभः दे, बोकारो। दिल्ली- पब्लिक- विद्यालयस्य (डीपीएस) बोकारो- शाखायाः मुख्याध्यापकः गोपालनारायणविश्वकर्मा, शिक्षकः रोहितरञ्जनः च स्वकीयेन उत्कृष्टेन शैक्षिकयोगदानेन प्रतिष्ठितेन 'भारत राष्ट्रीय- शिक्षक- पुरस्कार-2026' इति राष्ट्रिय- शिक्षक- सम्मानेन सम्मानितौ स्तः। सूक्ष्म-लघु-मध्यम-उद्यम-मन्त्रालयेन (एमएसएमई), नीति-आयोगेन, भारतसर्वकारेण च सम्बद्धस्य प्रतिष्ठितस्य सेन्टर फॉर एजुकेशनल डेवलपमेण्ट (सीईडी) फाउण्डेशन इत्यस्य तत्त्वावधाने ग्रेटर-नोएडा-स्थिते आईआईएलएम-विश्वविद्यालय-परिसरे आयोजिते 'भारत एजुकेशन कॉन्क्लेव एण्ड नेशनल अवार्ड्स-2026' इति समारोहः सम्पन्नः। अस्मिन् समारोहे शिक्षकद्वयम् सम्मानितम्। समारोहे प्रो. दिनेशसिंहः (कुलाधिपतिः, के. आर. मंगलंविश्वविद्यालयः, गुरुग्राम), जॉन लोहरः (कार्यकारी-निदेशकः, यूजी-कार्यक्रमाः, बी. डी. वाधवा (एवीएसएम, प्रो-कुलाधिपतिः एमेरिटस, आईआईएलएम्), सीईडी-फाउण्डेशनस्य अध्यक्षः डॉ. प्रियदर्शीनायकः इत्यादयः देशस्य विभिन्नेभ्यः भागेभ्यः समागताः प्रमुखाः शिक्षाविदः उपस्थिताः आसन्। तेषां गरिमामयी-सन्निधौ शिक्षकद्वयम् अलङ्कृतम्। उल्लेखनीयं यत् समारोहे समग्रात् झारखण्ड- राज्यात् केवलं डीपीएस- बोकारो- विद्यालयस्य एतौ द्वौ शिक्षकौ अस्य गौरवपूर्णस्य राष्ट्रिय- सम्मानस्य कृते चयनितौ। विस्तृत-मूल्याङ्कन- प्रक्रियायाः अनन्तरं विद्यालय-शिक्षाक्षेत्रे तयोः उत्कृष्टयोगदानं, समर्पितसेवा, अध्यापनक्षेत्रे नवाचारः, प्रभावी नेतृत्वं, विद्यार्थिनां सर्वाङ्गीण- विकासाय तयोः अखण्डा प्रतिबद्धता इत्यादीन् गुणान् दृष्ट्वा राष्ट्रिय-सम्मानाय तयोः चयनं कृतम्। शिक्षायाः नैतिकमूल्यानां सुदृढीकरणे, आधुनिक- शिक्षण- प्रविधीनां सफलतया स्वीकरणे तथा भाविपीढ्याः प्रतिभाविकासे तयोः योगदानम् अनुकरणीयम् इति मन्यमानैः आयोजकैः तौ राष्ट्रिय-सम्मानेन विभूषितौ।

राष्ट्रियस्तरे पुनः प्राप्तेन अस्मिन् गौरवपूर्णे सम्मानेन डीपीएस-बोकारो-विद्यालय-परिवारे हर्षोल्लासस्य वातावरणम् अस्ति। विद्यालयस्य प्राचार्यः डॉ. ए. एस. गंगवारः हर्षं व्यक्तं कुर्वन् विश्वकर्मावर्यस्य, रञ्जनवर्यस्य च अभिनन्दनं कृतवान् तथा ताभ्यां शुभकामनाः प्रदत्तवान्। बोकारोनगरं प्रत्यागते तस्मिन् शुक्रवासरे प्राचार्येण तयोः सम्मानस्वरूपं समारोहात् प्राप्तं स्मृतिफलकं प्रशस्तिपत्रं च प्रतीकात्मकरूपेण प्रदत्तम्। अपि च पीतपट्टिकां धारयित्वा तयोः उत्साहवर्धनं कृतम्। अवसरे प्राचार्यः उक्तवान् "अध्यापने नवाचारः, समर्पणभावना तथा निरन्तरं नूतनं ज्ञातुं जिज्ञासा एव शिक्षकं महान् करोति। अस्माकं शिक्षकयोः अयं राष्ट्रियः सम्मानः न केवलं विद्यालयस्य, अपि तु समग्रस्य बोकारो-नगरस्य झारखण्ड-राज्यस्य च शिक्षाजगतः कृते अत्यन्तं गौरवास्पदः विषयः अस्ति। विद्यालय-परिवारस्य सदस्यैः प्राप्तः प्रत्येकः सम्मानः विद्यालयस्य कठिनपरिश्रमस्य, समर्पणस्य अभिनवचिन्तनस्य च प्रमाणम् अस्ति।" सम्मानितौ शिक्षकौ अपि विद्यालय-परिवाराय तथा प्राचार्याय डॉ. गंगवाराय तस्य मार्गदर्शनाय विशेषरूपेण कृतज्ञतां प्रकटितवन्तौ। ज्ञातव्यं यत् गणितविषये निपुणः गोपालनारायणविश्वकर्मा विगतैः पञ्चविंशतिवर्षैः शिक्षाक्षेत्रे स्वकीयां सेवां प्रददाति। अपरतः फ्रेंच-भाषायाः शिक्षकः रोहितरञ्जनः अपि अध्यापनक्षेत्रे प्रायः द्वादशवर्षाणां सुदीर्घम् अनुभवम् अधिगतम् अस्ति।






# फर्रुखाबादनगरे संस्कृतभारत्याः संगोष्ठी समायोजिता

**हिमसंस्कृतवार्ताः- आचार्यः दीनदयालशुक्लः**

फर्रुखाबाद- नगरस्य भारतीय- महाविद्यालयस्य सभागारस्य संस्कृतभारत्याः संगोष्ठी आयोजिता। मुख्यातिथिः विशेषातिथिः संस्कृतभारत्याः अखिलभारतीय- अभिलेखागारस्य प्रमुखः हुलासचन्द्रमहोदयः, विशेषातिथिः च संस्कृतभारतीपूर्वोत्तरप्रदेशस्य क्षेत्रीयसङ्गठनमन्त्री डॉ. रत्नेशत्रिवेदी च आसन्। कार्यक्रमस्य अध्यक्षता महाविद्यालयस्य प्राचार्यः डॉ. रमणप्रकाशः अकरोत्। अस्मिन् अवसरे मुख्यातिथिः जनसामान्यं प्रति संस्कृतभाषायाः प्रसारणार्थं युक्तीः साझां कृत्वा भारतीयसंस्कृतेः संरक्षणार्थं संस्कृतस्य नित्यप्रयोगे बलं दत्तवान्। विशेषातिथिः श्रमिकाणां मध्ये उत्साहं प्रवर्तयन् फर्रुखाबादनगरे संस्कृतस्य प्रचारार्थं नूतनानां अत्याधुनिकसञ्चारप्रौद्योगिकीनां प्रयोगे बलं दत्तवान्। कानपुरप्रान्ताध्यक्षः श्री अजीत अग्रवालस्य सहमतिद्वारा डॉ. रत्नेशत्रिवेदिवा डॉ. संदीपकुमारद्विवेदिनं फर्रुखाबादजनपदस्य जिलासमन्वयकत्वेन नियोजितवान्। अस्मिन् अवसरे फर्रुखाबादमण्डलस्य संस्कृतकार्यकर्तारः डॉ. उपेन्द्र तिवारी, रमाकान्त द्विवेदी, अर्चनावर्या, रेणु अवस्थी, रंजन सक्सेना च उपस्थिताः आसन्। भारतीय- महाविद्यालयस्य प्राध्यापकेषु विवेक सिंहः, डॉ. आलोक बिहारीलालः, समीर गुप्ता, डॉ. प्रेम शंकर पाण्डे, डॉ. निधिश कुमार सिंह, डॉ कुमारादयः समुपस्थिताः आसन्।

**हिमसंस्कृतवार्ताः, नारदोपाध्यायः**

# महालयश्राद्धम्

## तर्पण-पूजन-पिण्डदानादिकम्

अग्रिमस्य २७-सितम्बर-रविवासरतः १०- अक्तूबर- शनिवासरपर्यन्तं यः कालः, सः पितृपक्षत्वेन हिन्दुसनातनिभिः अस्माभिः प्रतिवर्षं परिपाल्यते। भाद्रपद-शुक्लपक्षः यदा सम्पूर्णः जायते, ततः आरभ्य आश्विनशुक्लपक्षः यः कालः, सः पितृपक्षनाम्ना ख्यातः। भाद्रपदशुक्लपक्षस्य पूर्णिमातिथिना सह आश्विनकृष्णपक्षस्य अमावस्यापर्यन्तं साकल्येन षोडश दिनानि भवन्ति, एतेषां दिनानां समाहारकालः हि षोडशश्राद्धमिति नाम्ना प्रसिद्धम्। अस्मिन् कालावधौ पुत्रैः पितृणां महालयश्राद्धं क्रियते। अस्माकम् एकवर्षमितकालः पितृलोकस्य गणनायाम् एकम् अहोरात्रं भवति। एवमेव अस्माकम् उत्तरायणकालः, तेषां दिनम्, दक्षिणायनकालश्च तेषां रात्रिकालः भवति। दक्षिणायनकाले यदा सूर्यः कन्याराशिं प्रविशति, तदा तेषां दिनस्य मध्याह्नकालः भवति। पितृपक्षे पितृणां स्मरणाय आचरितेन महालयश्राद्धेन सन्तृप्ताः पितरः पुत्रेभ्यः नानामङ्गलाशिर्भिः सह धनधान्य- सन्तान- यशस्सुख- शान्त्यादिकं प्रददति, तेषां पितृभक्तानां पुत्राणां नानामनोरथान् च पूरयन्ति ते पितरः। पितरः वर्षस्य यस्यां तिथौ दिवङ्गताः, पितृपक्षस्य तस्यामेव तिथौ तेषां महालयश्राद्धम् पुत्रैः आचरणीयम्। अस्यां तिथौ आचरितं महालयश्राद्धं तत्तत्परिवारान्तर्गतानां सर्वेषां पितृणां संस्मरणं सञ्जायते। अतः अस्माभिः सुपुत्रैः पितृस्मरणार्थं तद्दिने तर्पण- पूजन- पिण्ड- सिद्धान्नदानादिकं सश्रद्धं कार्यमिति, शुभम्।

# सिरमौरस्य राजकीय- उच्च- विद्यालयस्य धारस्य छात्रः अभिनवराणा देशे विद्यालयस्य नाम उज्ज्वलीकृतवान्



**हिमसंस्कृतवार्ताः- सिरमौरः ।** राजकीय- उच्च- विद्यालय- धारस्य दशमकक्षायाः मेधावी छात्रः अभिनवराणा 'हिमसंस्कृतम् (न्यासः)' संस्थायाः 'हिमसंस्कृतवार्ता' इति दैनिक- ई- संस्कृत- समाचारपत्र- प्रकल्पेन आयोजितायाम् अखिलभारतीय- संस्कृतगीत- प्रतियोगितायाम् (२७ अगस्त २०२६ तः ०७ सितम्बर २०२६ पर्यन्तम्) द्वितीयं स्थानं प्राप्य विद्यालयस्य समग्रक्षेत्रस्य च गौरवम् अवर्धयत्। इयं प्रतियोगिता संस्कृतसप्ताहस्य शुभावसरे ऑनलाइनमाध्यमेन आयोजिता आसीत्। छात्रस्य अस्याम् अभूतपूर्वायां सफलतायां विद्यालयस्य प्रभारी ईश्वरचन्द्रराणा, संस्कृताध्यापकः राजेन्द्रसिंहठाकुरः, हिन्दी- अध्यापकः सुभाषशर्मा, टीजीटी (नॉन-मेडिकल) अध्यापकः सुनीलकुमारः, टीजीटी (आर्ट्स) अध्यापकः कँवरराणा, टीजीटी (आर्ट्स) अध्यापिका रामरत्तीदेवी, कला-अध्यापिका सीमाशर्मा, आईटीसी-अध्यापिका रीनादेवी, प्राथमिक- विद्यालयस्य सर्वे अध्यापकाः अभिनव राणा इत्यस्य पितरौ वर्धापनं समर्पितवन्तः, छात्रस्य उज्ज्वल-भविष्याय शुभाशयाः च प्रकटितवन्तः। विद्यालयस्य प्रभारी ईश्वरचन्द्रः उक्तवान् यत् इयं राष्ट्रियस्तरीया प्रतियोगिता आसीत्, यस्याम् अभिनवराणा द्वितीयं स्थानं प्राप्तवान्। एतत् विद्यालयस्य कृते अतीव गौरवस्य विषयः अस्ति। संस्कृताध्यापकः राजेन्द्रसिंहः अवदत् यत् अनेन छात्रेण समग्रे भारते द्वितीयं स्थानं प्राप्य एतत् सिद्धं कृतं यत् परिश्रमेण निष्ठया च वयं स्वलक्ष्यं प्रति अग्रसराः भूत्वा सफलतां प्राप्तुं शक्नुमः। अभिनव राणा अस्यां प्रतियोगितायां भागं गृहीत्वा समग्रस्य क्षेत्रस्य नाम उज्ज्वलीकृतवान्। अनेन सह एव अस्य विद्यालयस्य अन्ये प्रतिभागी-छात्रे वंशिका राणा अवनी राणा च अपि विद्यालयप्रशासनेन सम्मानिते। अभिनव राणा इत्यस्य पिता बलदेवराणा उक्तवान् यत् अस्याः सफलतायाः श्रेयः छात्रस्य कठोरपरिश्रमाय, संस्कृताध्यापकस्य च कुशलमार्गदर्शनाय गच्छति। विद्यालयप्रभारी ईश्वरचन्द्रः छात्राणां प्रतिभायै प्रोत्साहनार्थम् अस्याः प्रतियोगितायाः आयोजनकृते 'हिमसंस्कृतम् न्यास' प्रकल्पस्य संयोजकसमित्याः कृते अपि कार्तज्ञ्यं (धन्यवादम्) व्यक्तम् अकरोत्। छात्रप्रोत्साहनस्य अस्मिन् मङ्गलावसरे प्राथमिक- विद्यालयस्य प्रभारी टीकारामशर्मा, जेबीटी-अध्यापकः श्यामसिंहठाकुरः, चतुर्थश्रेणीकर्मचारिणौ भावसिंहराणा, सुमित्राराणा च उपस्थिताः आसन्।

# देवप्रयागविकासखण्डस्य

## संस्कृतछात्रस्पर्धाः भव्यतया सम्पन्नाः "संस्कृताध्ययनेन सर्वसमाजस्य हितं निहितम्"- डॉ. मूलचन्द्रशुक्लः



**हिमसंस्कृतवार्ताः- कुलदीप मैन्दोला, देवप्रयागः।** उत्तराखण्ड- संस्कृत- संस्थानस्य, हरिद्वारस्य तत्त्वावधाने 2026–27 तमवर्षस्य विकासखण्ड-देवप्रयागीयाः संस्कृत-छात्र-प्रतियोगिताः 23–24 सितम्बर 2026 दिनांके राजकीय- इण्टर- कॉलेज- महड़जाली इति विद्यालये सफलतया सम्पन्नाः।

### दीपप्रज्वलनेन स्पर्धानामारम्भः

षट्सु विधासु विद्यार्थिनां प्रतिभायाः अद्भुतं प्रदर्शनम् कनिष्ठवर्गे (६–१०), वरिष्ठवर्गे (११– परास्नातकः) संस्कृतनाटकं, समूहगानं, समूहनृत्यं, वादविवादः, आशुभाषणं, श्लोकोच्चारणम् इत्यादयः स्पर्धाः आयोजिताः। प्रतिभागिभिः उत्कृष्टा संस्कृतप्रस्तुतिः प्रदर्शिता।

### पतञ्जलिगुरुकुलस्य मूल्यग्रामस्य उल्लेखनीयः विजयः

पतञ्जलिगुरुकुलं, मूल्यग्रामः कनिष्ठवर्गे समूहनृत्ये, वादविवादे, आशुभाषणे, श्लोकोच्चारणे च प्रथमस्थानम् अलभत। वरिष्ठवर्गे समूहगाने, वादविवादे, आशुभाषणे, श्लोकोच्चारणे च अपि प्रथमस्थानं प्राप्तम्।

### षट्सु विधासु विद्यार्थिनां प्रतिभाया अद्भुतं प्रदर्शनम्

कनिष्ठवर्गे (६–१०), वरिष्ठवर्गे (११–परास्नातक) च संस्कृतनाटकं, समूहगानं, समूहनृत्यं, वादविवादः, आशुभाषणं, श्लोकोच्चारणम् इत्यादयः स्पर्धाः आयोजिताः। प्रतिभागिभिः उत्कृष्टा संस्कृतप्रस्तुतिः प्रदर्शिता।

### समापनसमारोहे विजेतॄणां सम्मानः

समापनसमारोहे मुख्यातिथिः डॉ. मूलचन्द्रशुक्लः, श्रीदेवसुमन- उत्तराखण्ड- विश्वविद्यालयस्य संस्कृतविभागाध्यक्षः आसीत्। विशिष्टातिथिः राधादेवी तथा अध्यक्षः सियारामचौहानः च उपस्थितौ आस्ताम्।

# सरस्वती-विद्या-मन्दिरे रखोटायां 'वन्दे मातरम्' इत्यस्य सार्ध-शत-वर्षाणां (१५०) सम्पूर्तौ 'नमामि भारतम् वन्दे मातरम्' सामूहिक- गान- कार्यक्रमः; १७९ जनाः उपस्थिताः



**हिमसंस्कृतवार्ताः- मण्डी।** सरस्वती-विद्या-मन्दिर-रखोटा-विद्यालये अमर-राष्ट्रगीतस्य 'वन्दे मातरम्' इत्यस्य सार्ध-शतवर्षाणां (१५० वर्षाणां) परिपूर्तेः उपलक्ष्ये गरिमामयस्य भव्य-कार्यक्रमस्य आयोजनं विहितम्। अस्मिन् कार्यक्रमे अभिभावकैः, स्थानीय-नागरिकैः, पुरातन-छात्रैः, आचार्य-भगिनीभिः, छात्र-छात्राभिः च सह आहत्य ऊनशीत्यधिक-शतं (१७९) जनाः सोत्साहं भागं गृहीतवन्तः। अस्मिन् पावन-अवसरे समैः उपस्थितजनैः 'वन्दे मातरम्' इत्यस्य सम्पूर्ण-गानं विधातुं, राष्ट्रगीतं प्रति सर्वोच्च- सम्मान-समर्पणाय 'राष्ट्रभाव-जागृत-सङ्कल्पः' स्वीकृतः। कार्यक्रमस्य अध्यक्षता निवृत्त-सेनानायकः बलदेवचौहान- महोदयः अकरोत्, यत्रैव मुख्यवक्तृरूपेण विद्याभारत्याः प्रान्त-अभिलेखागार- संयोजकः, अर्थशास्त्रस्य निवृत्तप्रवक्ता जालमसिंहमहोदयः समुपस्थितः आसीत्। समारोहस्य शुभारम्भः वन्दे मातरम्-गानेन, मङ्गलदीप-प्रज्वालनेन, सरस्वती-वन्दनया च अभवत्। विद्यालयस्य मुख्याध्यापिका श्रीमती पूजाठाकुर-महोदया समागतानां समेषां विदुषां मान्यानाम् अतिथीनां च सादरं स्वागतं व्याहृतवती। तदनन्तरं मुख्यवक्त्रा जालमसिंह-महोदयेन स्व-सारगर्भित-विचाराः उपस्थापिताः। मुख्य-अतिथिना स्व-उद्बोधने सर्वेऽपि उपस्थिताः राष्ट्रगीतस्य 'वन्दे मातरम्' इत्यस्य गौर-संरक्षणाय सम्मानाय च प्रेरिताः। विद्यालय-प्रबन्धन-समित्याः अध्यक्षः देशराजमहोदयः मुख्यातिथिं मुख्यवक्तारं च पारम्परिक- हिमाचली- टोपिका- समर्पणेन स्मृतिचिह्नेन च सम्मानितवान्।

कार्यक्रमस्य परिसमाप्तौ विद्यालय- प्रबन्धन-समित्याः अध्यक्षेण देशराजमहोदयेन समेषां धन्यवादः ज्ञापितः। अन्ते च राष्ट्रगानेन सह अस्य भव्य-आयोजनस्य शान्तिपूर्वकं समापनम् अभवत्।

# संस्कृत-ओलम्पियाड्-प्रतियोगितायां राजकीय-उच्च- विद्यालय- सिल्हस्य छात्राणां श्रेष्ठप्रदर्शनम्



**हिमसंस्कृतवार्ताः- बिलासपुरं, हिमाचलप्रदेशः**
केन्द्रीय- संस्कृत- विश्वविद्यालयः, नवदेहली इत्यस्य सौजन्येन आयोजितायाम् अखिलभारतीय-संस्कृत- ओलम्पियाड- प्रतियोगितायां हिमाचलप्रदेशस्य बिलासपुर-मण्डलस्य कोटधार-क्षेत्रस्य राजकीय- उच्च- विद्यालय- सिल्हस्य छात्रैः उत्कृष्टं प्रदर्शनं कृत्वा स्वर्ण- रजत- कांस्यपदकानि प्राप्तानि। विद्यालयस्य संस्कृताध्यापकः डॉ. अशोककुमारः अवदत् यत् विद्यालयस्य कर्मठ-शिक्षकाणां कुशल-मार्गदर्शनेन एव एते छात्राः अस्यां राष्ट्रियस्तरीयायां प्रतियोगितायां सफलतां प्राप्तवन्तः, अयं विद्यालयस्य कृते अत्यन्तं गौरवस्य विषयः अस्ति। केन्द्रीय- संस्कृत-विश्वविद्यालयः विजेतृभ्यः छात्रेभ्यः पदकानि, दैनन्दिनीं, लेखनीं च प्रदाय तेषाम् उत्साहवर्धनम् अकरोत्। अस्यां प्रतियोगितायां लब्धसफलतायाः विवरणम् इत्थम् अस्ति। षष्ठकक्षायाः वंशराणा प्रथमस्थानं प्राप्य स्वर्णपदकम्, मोहितकुमारः द्वितीयस्थानं प्राप्य रजतपदकम्, शिवांशी च तृतीयस्थानं प्राप्य कांस्यपदकम् प्राप्तवती। अष्टमकक्षायाः पंकजराणा प्रथमस्थानं प्राप्य स्वर्णपदकम्, कनिका द्वितीयस्थानं प्राप्य रजतपदकम्, कीर्तिराणा च तृतीयस्थानं प्राप्य कांस्यपदकं प्राप्तवती। नवमकक्षायाः ध्रुवकुमारः प्रथमस्थानं प्राप्य स्वर्णपदकम्, रोहितकुमारः द्वितीयस्थानं प्राप्य रजतपदकम्, कार्तिकराणा च तृतीयस्थानं प्राप्य कांस्यपदकं प्राप्तवान्। दशमकक्षायाः च पलकचौधरी प्रथमस्थानं प्राप्य स्वर्णपदकम् प्राप्य सम्मानिता अभवत्। विद्यालयस्य कार्यवाहक-प्रभारी रामलालवर्यः अवदत् यत् संस्कृताध्यापकस्य डॉ. अशोककुमारस्य प्रेरणया एव छात्राः अस्यां प्रतियोगितायां भागं गृहीतवन्तः। अस्यां सफलतायां विद्यालयस्य शिक्षकाः पवनसिंहमन्हासः, विजयकुमारः, अञ्जनाकुमारी, सुभाषचन्द्रः, शीलादेवी च सर्वेभ्यः छात्रेभ्यः शुभकामनाः प्रदत्तवन्तः।

# सिद्धखाले द्विदिवसीया संस्कृतस्पर्धा सम्पन्ना, छात्राः धनराश्या प्रमाणपत्रैश्च सम्मानिताः संस्काराणां सशक्तं माध्यमं संस्कृतम्



**हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला।**
अटलोत्कृष्ट- राजकीय इण्टरकॉलेज सिद्धखाले उत्तराखण्ड- संस्कृत- संस्थानेन आयोजिता द्विदिवसीया विकासखण्डस्तरीया संस्कृतस्पर्धा २४ सितम्बर २०२६ दिनाङ्के समापिता। कार्यक्रमस्य अध्यक्षतां विद्यालयस्य प्रधानाचार्यः अजयकुमारशर्मा महोदयः अकरोत्। समापनसमारोहे विकासखण्डप्रमुखा रेणुरावतवर्या मुख्यातिथिरूपेण उपस्थिताभूत्। स्वीये सम्बोधने तया उक्तं यत् “संस्कृतमेव संस्काराणां मूलं माध्यमञ्च अस्ति” इति। विद्यालयेषु संस्कृतभाषायाः प्रचारार्थं अधिकप्रयत्नान् करणीयान् इति अपि सा प्रेरितवती। विशिष्टातिथिः सुनीतारावतवर्या सर्वेषां प्रतिभागिनां उत्साहवर्धनम् अकरोत्। समाजसेवकः दीनबन्धु ‘विरोधी’ स्वविद्यालयजीवनस्य स्मरणं कृत्वा संस्कृतस्य महत्त्वं प्रतिपादितवान्। समाजसेवकः वसन्तजोशी संस्कृतसंस्कृत्योः संरक्षणाय सर्वान् समाहूतवान्। क्षेत्रपञ्चायतसदस्या मनीषा रावतवर्या संस्कृतोत्थानसंवर्धनयोः विषये स्वविचारान् प्रस्तुतवती।
ग्रामप्रधानः चुरानीग्रामस्य राकेशनेगीवर्यः परिवर्तमानकाले संस्कृतशिक्षां रोजगारसङ्गं सम्बद्ध प्रेरणां दत्तवान्। विकासखण्ड- शिक्षाधिकारिणी किरणनेगीवर्या विकासखण्डस्तरात् जिलास्तराय चयनितान् छात्रान् शुभाशिषा अभिनन्दितवती। तया प्रथम– द्वितीय– तृतीयस्थानप्राप्तेभ्यः छात्रेभ्यः प्रमाणपत्राणि नगदधनराशिश्च प्रदाय सम्मानः कृतः। चयनिताः प्रतिभागिनः अधुना जिलास्तरीयासु संस्कृतस्पर्धासु सहभागित्वं करिष्यन्ति।
कार्यक्रमस्य सञ्चालनं विनोदडोबरियालः, राजेन्द्रसिंहः, मोहितपन्तश्च संयुक्तरूपेण अकुर्वन्। अस्मिन् अवसरे विकासखण्डस्तरीयसंयोजकः नरेशकुमारशर्मा (सहायकाध्यापकः संस्कृतं), शिखारावतः (प्रवक्ता आङ्ग्लभाषा), सतपालसिंहराणा (सहायकाध्यापकः गणितं), दीपकरावतः (प्रवक्ता भौतिकविज्ञान), दीक्षानेगी (सहायकाध्यापिका विज्ञानं), प्रभाकरशुक्लः (सहायकाध्यापकः हिन्दी) च प्रमुखरूपेण उपस्थिताः आसन्।

**हिमसंस्कृतवार्ताः, ईदरधीरजः**

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। मया एका विचित्रा वार्ता पठिता। आङ्ग्ल-देशे एकेन अन्धेन मद्यपेन जनेन यानं चालितम्। रात्रौ तेन बृहद्-यानस्य प्रकाशः अनुसृतः। शत-क्रोश-दूरं यानं नीतम्।
**नन्दिनी-** अहो! महदाश्चर्यम्! अन्धेन अपि यानं चालितम्! मया अन्या वार्ता श्रुता। पुण्य-नगरे एकस्य विशाल-प्रकोष्ठस्य भाटकं केवलं नवसहस्र-रूप्यकाणि इति उद्घोषितम्। तद् दृष्ट्वा बेङ्गलूरु-नगरस्य कर्मकरैः महान् विस्मयः प्रकटितः।
**काव्या-** सत्यम्! बेङ्गलूरु-नगरे तु भाटकम् अतीव अधिकम्। मया अपरा वार्ता प्राप्ता। अमेरिका-देशे एकया महिलया भाग्य-पत्रकेण विपुलं धनं जितम्। किन्तु तया कार्यालयस्य कार्यं न त्यक्तम्। तया तस्मिन् दिने अपि पूर्णं कार्यं कृतम्।
**नन्दिनी-** अहो तस्याः कार्यनिष्ठा! मया अपि नूतना वार्ता दृष्टा। भारते एकं नूतनं विद्युद्-यानं लोहमार्गस्य उपरि पतितम्। यानं कथं तत्र आगतम् इति केनापि न ज्ञातम्। धूमशकटस्य गमनं स्थगितम्।
**काव्या-** अहो विचित्राणि जगत्-कार्याणि! अस्तु, श्वः मिलिष्यामः।

# प्रौष्ठपदी-पूर्णिमा श्राद्धम्

सनातनधर्मे पितृणां तृप्तये क्रियमाणं कर्म ‘श्राद्धम्’ इति कथ्यते। "श्रद्धया दीयते यत् तत् श्राद्धम्" अर्थात् श्रद्धया पितृभ्यः यत् अन्नं जलं च समर्प्यते, तत् श्राद्धम् अस्ति। भाद्रपदमासस्य शुक्लपक्षस्य पूर्णिमातिथौ यत् श्राद्धं क्रियते, तत् पूर्णिमा-श्राद्धम् (प्रौष्ठपदी-पूर्णिमा श्राद्धम्) इति नाम्ना ज्ञायते। एषा तिथिः महालयस्य (पितृपक्षस्य) आरम्भस्य सूचिका भवति।

**कस्य कृते क्रियते इदं श्राद्धम्?**

शास्त्रविधानस्य अनुसारं येषां पूर्वजानां मृत्युः कस्यामपि पूर्णिमातिथौ (शुक्लपक्षे वा कृष्णपक्षे) अभवत्, तेषां पार्वणश्राद्धं भाद्रपदपूर्णिमातिथौ एव विधीयते। यद्यपि पितृपक्षः आश्विनकृष्णप्रतिपदातः आरभ्यते, तथापि पूर्णिमातिथौ मृतानां पितृणां निमित्तं केवलम् अस्मिन्नेव दिने श्राद्धं क्रियते।

**विधानं महत्त्वं च**

**तर्पणं पिण्डदानं च-** अस्मिन् दिने कुतुप-रौहिणादि-मुहूर्तेषु तिल-दर्भ-जलैः पितृणां तर्पणं क्रियते तथा च पिण्डदानं विधीयते।
**ब्राह्मणभोजनम्-** विधिवत् श्राद्धं समाप्य विप्राय सात्त्विकं भोजनं दीयते तथा यथाशक्ति दक्षिणा समर्प्यते।
**पञ्चबलि-कर्म-** गो-श्वान-काक-देवादिभ्यः भूमौ अन्नबलिः प्रदीयते।

**उपसंहारः-**

पूर्णिमा-श्राद्धस्य अनुष्ठानेन पितरः तृप्ताः सन्तुष्टाः च भवन्ति। तेषां शुभाशीर्वादेन कुले शान्तिः, समृद्धिः, वंशवृद्धिः, धर्मवृद्धिः च जायते। अतः सर्वेभ्यः सनातनधर्मिभ्यः पितृऋणात् मुक्तये श्रद्धायुक्तं पूर्णिमा-श्राद्धं करणीयम्।

# श्री-निगमान्त- महादेशिकाचार्यः भारतीय- ज्ञान-परम्परायाः समृद्धशिखरपुरुषः- प्रो. मुरलीमनोहरपाठकः



## श्री-निगमान्त- महादेशिकाचार्यस्य ७५८तमं वार्षिकं श्रीनक्षत्रजयन्त्युत्सवम् उपलक्ष्य राष्ट्रियविद्वत्सङ्गोष्ठी सम्पन्नम्

**हिमसंस्कृतवार्ताः- नवदेहली।** श्री- निगमान्त- महादेशिकाचार्यः भारतीय- ज्ञान- परम्परायाः, श्रीवैष्णवदर्शनस्य, शास्त्रीयचिन्तनस्य च समृद्धायाः परम्परायाः विशिष्टतमः आचार्यः अस्ति। तस्य बहुआयामिकं कृतित्वं भारतीय- ज्ञानविमर्शं गाम्भीर्येण, व्यापकतया, वैचारिक- समृद्ध्या च समन्वितं करोति। दर्शन- साहित्य- तर्कशास्त्र- मीमांसा- वेदान्त- श्रीवैष्णवसिद्धान्तादिषु क्षेत्रेषु तस्य योगदानं भारतीयशास्त्रपरम्परायाः समृद्धायाः बौद्धिकसम्पत्तेः महत्त्वपूर्णम् अध्यायम् अस्ति।

इति विचारं श्रीलालबहादुरशास्त्री- राष्ट्रिय- संस्कृत- विश्वविद्यालयस्य, नवदेहल्याः कुलपतिः प्रो. मुरलीमनोहरपाठकः उक्तवान्। सः २३ सितम्बर २०२६ दिनाङ्के विश्वविद्यालयस्य वाचस्पतिसभागारे आयोजिते श्री-निगमान्त- महादेशिकाचार्यस्य ७५८ तमस्य वार्षिकस्य श्रीनक्षत्रजयन्त्युत्सवस्य उपलक्ष्ये आयोजितायां एकदिवसीय- राष्ट्रियविद्वत्सङ्गोष्ठ्यां सम्बोधनं कुर्वन् आसीत्। विश्वविद्यालयस्य दर्शनशास्त्र- पीठान्तर्गत- मीमांसाविभागेन, इण्टीग्रेटेड् श्रीवैष्णव एकेडमी फॉर रेनेसांस, पाटलीपुत्रं, बिहार इत्येतयोः संयुक्ततत्त्वावधानेन सङ्गोष्ठी आयोजिता। कुलपतेः प्रो. मुरलीमनोहरपाठकस्य संरक्षणे सम्पन्नायां सङ्गोष्ठ्यां देशस्य विभिन्नेभ्यः प्रदेशेभ्यः समागतैः विद्वद्भिः आचार्यस्य व्यक्तित्वं, कृतित्वं, दार्शनिक- चिन्तनं, शास्त्रीययोगदानं च आधृत्य गहनः विमर्शः कृतः।कुलपतिः प्रो. मुरलीमनोहरपाठकः स्वीयसम्बोधने अवदत् यत् श्री-निगमान्त-महादेशिकाचार्यस्य कृतित्वं कस्यापि एकस्य सीमितस्य ज्ञानक्षेत्रस्य परम्परायाः वा पर्यन्तं सीमितं नास्ति। दर्शनं, साहित्यं, तर्कः, मीमांसा, वेदान्तः, श्रीवैष्णवसिद्धान्तश्च इत्येतेषु विविधेषु क्षेत्रेषु तस्य विद्वत्ता भारतीयशास्त्रपरम्परायाः अन्तर्निहितां व्यापकतां गाम्भीर्यं च प्रकाशयति। तस्य ग्रन्थाः भारतीय- दार्शनिकचिन्तनस्य तार्किकतायाः, गाम्भीर्यस्य, सातत्यपूर्णस्य प्रवाहस्य च महत्त्वपूर्णाः प्रमाणाः सन्ति। सः अवदत् यत् वर्तमानकाले भारतीय- ज्ञानपरम्परायाः प्रामाणिकाध्ययनस्य व्यापकप्रचारस्य च आवश्यकता अधिकतरा अभवत्। श्री-निगमान्त-महादेशिकाचार्यस्य ग्रन्थानां चिन्तनस्य च गहनाध्ययनं नवपीढीं भारतीयदर्शनस्य तार्किकपरम्परया, शास्त्रीयानुशीलनेन, ज्ञानस्य निरन्तरतया च परिचितां कर्तुं महत्त्वपूर्णां भूमिकां निर्वहति। एतादृशाः विद्वत्समायोजनाः ज्ञानपरम्परायाः संरक्षणेन सह तस्याः समकालीनसन्दर्भैः संवादस्थापनस्य प्रभावी माध्यमानि भवन्ति।

कार्यक्रमस्य शुभारम्भः कुलपतिना प्रो. मुरलीमनोहरपाठकेन दीपप्रज्वलनेन कृतः। ततः वैदिकमङ्गलाचरणेन लोकमङ्गलाचरणेन च सङ्गोष्ठ्याः विधिवत् शुभारम्भः अभवत्। कार्यक्रमस्य संयोजकः डॉ. राजेशकुमारगुर्जरः उपस्थितानाम् अतिथीनां, विदुषां, प्रतिभागिनां च स्वागतं कृत्वा सङ्गोष्ठ्याः उद्देश्यान् आयोजनस्य पृष्ठभूमिं च प्रकाशितवान्।

अस्मिन् अवसरे श्रीवैष्णवसिद्धान्ते, संस्कृतवाङ्मये, ग्रन्थसंरक्षणे, हिन्दीव्याख्यायां, शास्त्रप्रचारे, दीक्षापरम्परायां, विद्वत्सेवायां च श्रीश्रीस्वामी- दामोदरप्रपन्नाचार्यस्य (दुर्गेशकुमारद्विवेदी) योगदानस्य प्रति श्रद्धां, कृतज्ञतां सम्मानं च प्रकटयन् विश्वविद्यालयस्य दर्शनशास्त्रपीठान्तर्गत- मीमांसाविभागस्य पक्षतः कुलपतेः प्रो. मुरलीमनोहरपाठकस्य शुभहस्ताभ्याम् अभिनन्दनपत्रं समर्पितम्। तथैव इण्टीग्रेटेड श्रीवैष्णव एकेडमी फॉर रेनेसांस्, पाटलीपुत्रं, बिहार इत्यस्य पक्षतः कुलपतिः प्रो. मुरलीमनोहरपाठकः 'संस्कृतवाङ्मयदिवाकरः' इति उपाधिना विभूषितः। सम्मानपरम्परायां श्रीश्री विजयनारायणदासवर्यं 'भगवत्भागवतसेवातत्परः', श्रीमाधवाचार्यवर्यं 'विशिष्टाद्वैतसिद्धान्त- प्रवचनरत्नाकरः', श्रीरघुनाथाचार्यवर्यं च 'वेदपारायणसेवारत्नाकरः' इति सम्मानैः सम्मानितवन्तः। दर्शनशास्त्रपीठस्य पीठाध्यक्षः प्रो. अनेकान्तकुमारजैनः स्वीयसम्बोधने अवदत् यत् सः स्वयं वेदान्तदेशिकस्य जीवनचरित्रात् प्रेरणां प्राप्नोति। सः श्री-निगमान्त- महादेशिकाचार्यस्य व्यक्तित्वं कृतित्वं च भारतीयशास्त्रपरम्परायाः महत्त्वपूर्णां उपलब्धिं निरूप्य तस्य ग्रन्थानां चिन्तनस्य च व्यापकाध्ययनस्य आवश्यकतायाः विषये बलं दत्तवान्। आचार्यस्य जीवनं कृतित्वं च भारतीयज्ञानपरम्परायां साधना- विद्वत्ता- शास्त्रीयानुशीलनानां समन्वयस्य परिचायकमिति सः उक्तवान्। इण्टीग्रेटेड श्रीवैष्णव एकेडमी फॉर रेनेसांस, पाटलीपुत्रस्य संस्थापकः श्रीदामोदरप्रपन्नाचार्यजी स्वीयसम्बोधने श्री- निगमान्त-महादेशिकाचार्यस्य परम्परां, शास्त्रीयदृष्टिं, बहुआयामिकं योगदानं च प्रकाशयन् तस्य ज्ञानपरम्परायाः संवर्धनस्य तथा शास्त्रीयसाहित्यस्य अध्ययनसंरक्षणयोः व्यापक- प्रोत्साहनस्य आवश्यकता प्रतिपादितवान्।

कटकीमठस्य, पुरी, ओडिशा इत्यस्य प्रमुखः श्रीश्रीविजयनारायणदासवर्यैः स्वीयसन्देशे श्री- निगमान्त-महादेशिकाचार्यस्य शास्त्रीय- आध्यात्मिकपरम्परायाः महत्त्वं रेखाङ्कितवान्। सः आचार्यस्य ज्ञानं, साधनां, शास्त्रीयचिन्तनं च भारतीयस्य आध्यात्मिकदार्शनिकपरम्परायाः महत्त्वपूर्णां धरोहरं निरूपितवान्। सङ्गोष्ठ्याम् आभासीयमाध्यमेन श्रीरङ्गक्षेत्रस्य श्रीउ. वे. माधवाचार्यजी, काञ्चीपुरस्य श्रीउ.वे. टी.एस. रघुनाथाचार्यजी इत्, श्रीकान्त- अहोबिलमठ- आदर्श- महाविद्यालयसम्बद्धः विद्वान् स्वस्वविषयेषु सारगर्भितान् व्याख्यानान् प्रस्तुतवन्तः। विद्वद्भिः श्री- निगमान्त- महादेशिकाचार्यस्य दर्शनं, साहित्यं, तर्कशास्त्रं, श्रीवैष्णवसिद्धान्तपरम्परायां तस्य योगदानस्य विविधाः पक्षाः च शास्त्रीयप्रमाणैः सह प्रस्तुताः।विश्वविद्यालयस्य वरिष्ठैः महनीयैः आचार्यैः अपि श्री-निगमान्त-महादेशिकाचार्यस्य जीवनं, साहित्यं, दर्शनं, शास्त्रीययोगदानं च आधृत्य विविधेषु विषयेषु स्वीयाः विचाराः शास्त्रीयमन्तव्याश्च प्रस्तुताः। वक्तृभिः विशेषतः न्याय- मीमांसा- वेदान्त- श्रीवैष्णवसिद्धान्तक्षेत्रेषु तस्य महत्त्वपूर्णं योगदानं रेखाङ्कितम्। तस्य कृतित्वं भारतीय- दार्शनिकपरम्परायाः गाम्भीर्यस्य, तार्किकतायाः, वैचारिकनिरन्तरतायाश्च सशक्तं परिचायकमिति वक्तारः अवदन्। सङ्गोष्ठ्यां बनारस- हिन्दू- विश्वविद्यालयस्य डॉ. ए. एस. श्रीरामजी, केन्द्रीय- संस्कृत- विश्वविद्यालयस्य, नवदेहल्याः डॉ. डी. दयानाथवर्यः देहली- विश्वविद्यालयस्य प्रो. ओमनाथबिमलीवर्यः इत्येषां विशिष्टा उपस्थितिः आसीत्। देशस्य विभिन्नेभ्यः प्रतिष्ठितेभ्यः विश्वविद्यालयेभ्यः संस्थानेभ्यश्च समागतानां विदुषां सहभागितया सङ्गोष्ठ्याः राष्ट्रियः शैक्षिकः शास्त्रीयश्च आयामः सुदृढः अभवत्। उपस्थितैः विद्वद्भिः स्वीयानुभवैः विद्वत्तया च श्री-निगमान्त- महादेशिकाचार्यस्य व्यक्तित्व-कृतित्व- दार्शनिकयोगदानकेन्द्रितं विमर्शं समृद्धम्।कार्यक्रमस्य कुशलं सञ्चालनं डॉ. पीताम्बरपौडेलः कृतवान्। अन्ते मीमांसाविभागाध्यक्षः प्रो. ए.एस. आरवमुदनजी सर्वेभ्यः अतिथिभ्यः, विद्वद्भ्यः, वक्तृभ्यः, प्रतिभागिभ्यश्च धन्यवादं ज्ञापितवान्। शान्तिमन्त्रस्य सामूहिकपाठेन राष्ट्रिय- विद्वत्सङ्गोष्ठ्याः गरिमापूर्णं समापनम् अभवत्। ततः उपस्थितैः विद्वद्भिः प्रतिभागिभिश्च प्रसादः स्वीकृतः।